ऽधरश्च विज्ञेयो धर्मो मूर्द्धानमाश्रितः। हृदि नारायणस्साध्ये अश्विनौ पूर्वपादयोः। वरुणश्चार्य्यमा चैव पश्चिमे तस्य सक्थिनी। शिश्नं संवत्सरस्तस्य मित्रोऽपानं समाश्रितः। पुच्छेऽग्निश्च महेन्द्रश्च कश्यपोऽथ ततो ध्रुवः। तारकाः शिशुमारस्य नास्तमेति चतुष्टयम्" विष्णुपु० २अं १२अ०। भाग० २३अ० अन्यथोक्तं यथा "केचिदेतत् ज्योतिरनीकं शिशुमारसंस्थानेन भगवतो वासुदेवस्य योगधारणायामनुवर्णयन्ति। यस्य पुच्छाग्रेऽवाक्शिरसः कुण्डलीभूतदेहस्य ध्रुव उपकल्पितः तस्य लाङ्गूले प्रजापतिरग्निरिन्द्रो धर्म इति। पुच्छमूले धाता विधाता च कट्यां सप्तर्षयः यस्य दक्षिणावर्त्तकुण्डलीभूतशरीरस्य यान्युदगयनानि दक्षिणपार्श्वे नक्षत्राणि उपकल्पयन्ति। दक्षिणानि तु सव्ये यथा शिशुमारस्य कुण्डलाभोगसन्निवेशस्य पार्श्वयोरुभयोरप्यवयवाः समसंख्या भवन्ति। पृष्ठे त्वजवीथी आकाशगङ्गा चोदरतः। पुनर्वसुपुष्यौ दक्षिणवामयोः श्रोण्योरार्द्राश्लेषा च दक्षिणवामयोः पादयोरभिजिदुत्तराषाढे दक्षिणवामपार्श्वयोर्न्यसेत् युञ्जीत। तथैव मृगशीर्षादीन्युदगयनानि दक्षिणपार्श्वे प्रातिलोम्येन प्रतियुञ्जीत। शतभिषाज्येष्ठे स्कन्धयोर्दक्षिणवामयोर्न्यसेत्। उत्तराहनावगस्त्यः अधराहनौ यमः मुखे चाङ्गारकः शनैश्चर उपस्थे बृहस्पतिः ककुदि वक्षस्यादित्यो हृदये नारायणो मनसि चन्द्रोनाभ्यामुशनास्तनयोरश्विनौ बुधः प्राणापानयो राहुर्गले केतवः सर्वाङ्गेषु रोमसु सर्वे तारागणाः। एतदुहैव भगवतो विष्णोः सर्वदेवतामयं रूपम् अहरहः सन्ध्यायां प्रयतो वाग्यतोनिरीक्षमाण उपतिष्ठेत"।

**शिशुवाह** पुस्त्री० शिशुं वहति वह-ण्वुल्। वनच्छागे हेमच०। स्त्रियां ङीष्। शिशुवाह्योऽस्य। शिशुवाह्य तत्रार्थे त्रिका०

**शिश्न** पु० शश-नक् नि०। मेढ्रे पुंचिह्नभेदे अमरः।

**शिश्विदान** त्रि० श्विद-कानच् द्वित्वम्। पापकारके अमरः

**शिष** वधे भ्वा० पर० सक० सेट्। शेषति अशेषीत्।

**शिष** परिशेषीकरणे वा चु० उभ० पक्षे भ्वा० पर०सक०सेट्। शेषयति ते शेषति अशिशेषत् त अशेषीत्। [शिष्टा।

**शिष** विशेषे रुधा०पर०सक०अनिट्। शिनष्टि लृदित्अशिषत्

**शिष्ट** त्रि०शास-क्त शिष-क्त वा। १शान्ते २वेदवाक्ये विश्वासयुते ३सुबोधे ४धीरे च "न पाणिपादचपलो न नेत्रचपलो मुनिः। न च वागङ्गचपल इति शिष्टस्य लक्षणम्" भा०आश्व० "धर्मो नातिगतोयैस्तु वेदः स परिबृंहितः। ते शिष्टा ब्राह्मणा प्रोक्ता नित्यमात्मगुणान्विताः" कूर्म० उप० २४अ०। "विशेषशब्दनिष्ठस्तु शेषः शिष्टः प्रकीर्त्यते। मन्वन्तरेषु ये शिष्टाः इह तिष्ठन्ति धार्मिकाः। मनुः सप्तर्षयश्चैव लोकसन्तानकारणात्। तिष्ठन्तीह च धर्मार्थं तान् शिष्टान् परिचक्षते। तैः शिष्टैः स्थापितो धर्मः स्थाप्यते वै युगे युगे" मत्स्यपु० १२० अ०। ५कृतशासने ६अवशिष्टे च।

**शिष्टाचार** पु० शिष्टानामाचारः। मत्स्यवहारे "ततः स्मार्त्तः स्मृतो धर्मो वर्णाश्रमविभागशः। एवं वै विविधो धर्मः शिष्टाचारः स उच्यते। त्रयी वार्त्ता दण्डनीतिः प्रजा वर्णाश्रमेज्यया। शिष्टैराचर्य्यते यस्मात् शिष्टाचारः स शाश्वतः। दानं सत्यं तपोऽलोभो विद्येज्या पूजनं दमः। अष्टौ तानि चरित्राणि शिष्टाचारस्य लक्षणम्। शिष्टमाचरन्त्येनं मनुः सप्तर्षयश्च ये। मन्वन्तरेषु सर्वेषु शिष्टाचारस्ततः स्मृतः। श्रुतिस्मृतिभ्यां विहितो धर्मो वर्णाश्रमात्मकः। शिष्टाचारविरुद्धस्तु धर्मः स साधुसम्मतः" मत्स्यपु० १२५अ०। "आचारश्चैव साधूनामिति" मनुना तस्य धर्मे प्रामाण्यमुक्तं स च वेदाविरुद्ध एव प्रमाणम् श्रुतिस्मृत्योर्भिन्नविषयत्वे सदाचारेण तत्र धर्मनिर्णयः। श्रुतिविरोधे स्मृतेरप्रामाण्यवत् स्मृतिविरोधे सदाचारस्य न धर्मनिर्णायकत्वम्। तेन दाक्षिणात्यानां मातुलकन्याविवाहस्य शिष्टैराचर्य्यमाणत्वेऽपि न प्रमाणता। तदेतत् "विरोधे त्वनपेक्षं स्यादसति ह्यनुमानं" जैमि० सूत्रेण निर्णीतम्। वशिष्ठेनापि "तदभावे शिष्टाचारः प्रमाणम्" इत्युक्तम्। ततश्च शिष्टाचारेण मूलस्मृतिरनुमीयते यथा होलकाद्याचारात्। ततः स्मृत्या मूलश्रुतिरनुयातव्येति अधिकरणमाला। अत एव अविगीतशिष्टाचारपरम्पराप्राप्तं ग्रन्थादौ मङ्गलाचरणं मङ्गलवादादौ व्यवस्थापितम्।

**शिष्टि** स्त्री शास-क्तिन्। १आज्ञायां २शासने अमरः। ३ताडने च "शिष्यशिष्टिरवधेन" स्मृतिः।

**शिष्य** त्रि० शास-क्यप्। १शिक्षणीये २छात्रे अमरः ३उपदेश्ये च। शिष्यलक्षणादि तन्त्रसा० उक्तं यथा

"शान्तो विनीतः शुद्धात्मा श्रद्धावान् धारणक्षमः। समर्थश्च कुलीनश्च प्राज्ञः सच्चरितो धनी। एवमादिगुणैर्युक्तः शिष्यो भवति नान्यथा। गुरुता शिष्यता वापि तयोर्वत्सरवासतः" तथा चोक्तं सारसंग्रहे "सद्०